दिनाङ्कः - 14/11/2024 सायम् - 06:20

**मुख्यवार्ताः**

- डोमिनिकादेशेन प्रधानमन्त्रिणं नरेन्द्रमोदिनं सर्वोच्चराष्ट्रियसम्मानं प्रदातुं उद्घोषितम्।
- राष्ट्रपतिः द्रौपदी मुर्मू अद्य सायङ्काले अष्ट वादने 'जनजातीय-गौरव-दिवसस्य' पूर्वसन्ध्यायां राष्ट्राय सन्देशम् प्रेषयिष्यति।
- झारखण्ड-महाराष्ट्रराज्ययो: विधानसभा-निर्वाचनाय प्रचाराभियानं द्रुततां भजते।
- श्रीलङ्कादेशे संसदीयनिर्वाचनाय मतदानं सुसम्पन्नम्।
- त्रिचत्वारिंशत्तमं भारत-अन्ताराष्ट्रिय-व्यापारमेलकम् अद्य नवदिल्ल्यां भारतमण्डपस्थाने समारब्धम्।

**डोमिनिका-सम्मानम्**

डोमिनिकादेशेन प्रधानमन्त्रिणं नरेन्द्रमोदिनं सर्वोच्चराष्ट्रियसम्मानं प्रदातुं उद्घोषितम्। कोविड- ऊनविंशत्या: महामारी-काले डोमिनिका-देशे तस्य योगदानस्य, भारत-डोमिनिका-देशयोः सहभगिता-सुदृढीकरणाय च तस्य समर्पणाय सम्मानाय च प्रधानमन्त्रिणे डोमिनिका-पुरस्कारः प्रदीयते। डोमिनिका-देशस्य राष्ट्रपतिः सिल्वेनी बर्टन इत्येषः आगामि-भारत-कैरिकॉम-शिखरसम्मेलनावधौ पुरस्कारोयं प्रदास्यति, यस्य आयोजनं अस्य मासस्य ऊनविंशतिदिनाङ्कात् एकविंशतिः दिनाङ्कपर्यन्तं गुयाना-राज्यस्य जॉर्जटाउन-नगरे भवितुं निश्चितम् अस्ति इति। डोमिनिकायाः प्रधानमन्त्रिकार्यालयस्य वक्तव्यानुसारि भारतेन एकविंशत्यधिक द्विसहस्रतम वर्षस्य फरवरीमासे कोविड् महामार्याः समये एस्ट्राजेनेका कोविड्-ऊनविंशति सूच्यौषधीनां सप्ततिः सहस्राणि मात्राः डोमिनिकादेशाय प्रेषिताः । अयं पुरस्कारं प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे भारतस्य स्वास्थ्यसेवायां, शिक्षायां, सूचनाप्रौद्योगिक्यां च डोमिनिका देशस्य समर्थनेन सहैव तथैव वैश्विकस्तरस्य जलवायुनिर्माणपरिकल्पनानां, स्थायिविकासस्य च प्रवर्धने तस्य भूमिकायाः कृते प्रदीयते।

**राष्ट्रपति -बिहारः**

राष्ट्रपतिः द्रौपदी मुर्मु: अद्य सायङ्काले अष्ट वादने 'जनजातीय-गौरव-दिवसस्य' पूर्वसन्ध्यायां राष्ट्राय सन्देशम् प्रेषयिष्यति। आकाशवाणीदिल्ली इन्द्रप्रस्थ वाहिन्यां आकाशवाण्याः सजवप्रसारणे , एफ़्. एम्. गोल्ड् वाहिन्यां एफ़्. एम्. रेन्बोवाहिन्यां च राष्ट्रपतेः मुर्मु वर्यायाः सन्देशस्य प्रसारणं करिष्यति। भगवतः बिरसा मुण्डा इत्यस्य जन्मवार्षिकस्य स्मरणार्थं श्वः जनजातीय-गौरव-दिवसः आचरिष्यते । अयं दिवसः राष्ट्रस्य इतिवृत्ते संस्कृतौ च आदिवासि-समुदायानां योगदानस्य सम्मानं करोति। राष्ट्रपतेः सन्देशः श्वः प्रातः पादोन नव वादने प्रसारणं अथ च सायं सार्ध पञ्च वादने च सर्वासु प्राथमिक-वाहिनिषु पुनः प्रसारणं भविष्यति। प्रधानमन्त्री नरेन्द्रमोदी श्वः जनजातिय-गौरव-दिवसावसरे बिहारराज्यस्य जमुई क्षेत्रं प्रति प्रस्थास्यति। क्षेत्रमिदम् आबा-भगवत: बिरसामुण्डाया: पञ्चाशदधिकैकशततमस्य जयन्ती-वर्ष-समारोहस्य प्रतीकमस्ति। श्रीमोदी अत्रावसरे श्व: प्रात: बिरसामुण्डाया: सम्माने एकस्या: स्मारकमुद्राया: प्रैष्यपत्रस्य चापि अनावरणं करिष्यति। अथ च अनेकासां विकासात्मक-परियोजनानां शिलान्यासम् उद्घाटनं च विधास्यति।

**झारखण्डप्रचारः**

झारखण्डराज्ये विधानसभा-निर्वाचनस्य प्रथमचरणस्य मतदानानन्तरं द्वितीय-चरणीयमतदानार्थं प्रचाराभियानं द्रुततां भजते। अनेके: वरिष्ठनेतार: स्वक्षेत्रे नैका: जनसभा: सम्बोधयिष्यन्ति। भाजपेतिदलस्य वरिष्ठो नेता तथा च उत्तरप्रदेशस्य मुख्यमंत्री योगीआदित्यनाथः धनबादे निर्वाचनसभां सम्बोधितवान्। सः आरोपितवान् यत् झामुमो-सर्वकारेण राज्ये आव्रजकेभ्यः जनेभ्यः अवैधरीत्या प्रवेशार्थं अनुमतिः प्रदत्ता। अपरपक्षे झामुमों दलस्य वरिष्ठो नेता मुख्यमन्त्री च हेमन्त सोरेनः अविकसितस्य झारखण्ड राज्यस्य कृते उत्तरदायी भाजपादलमस्ति इति आरोपितवान् । सः देवघरस्य सारथ् इत्यत्र निर्वाचनसभां सम्बोधितवान्।

राजद, अजसु, वामपक्षीय दलानां नेतारः अपि राज्यस्य विभिन्नेषु भागेषु नैर्वाचनिकसभाः सम्बोधयिष्यन्ति। द्वितीयचरणस्य अस्य मतदानं विंशति-दिनाङ्के समनुष्ठास्यते मतगणना च त्रयोविंशति दिनाङ्के प्रख्यापयिष्यते। अपरत्र महाराष्ट्रराज्येऽपि विभिन्नैः दलैः प्रचाराभियानं विधीयते। विंशति-दिनाङ्के एकस्मिन्नेव चरणे अत्र निर्वाचनं भविष्यति।

**श्रीलङ्कानिर्वाचनम्**

श्रीलङ्कादेशे संसदीयनिर्वाचनाय मतदानं सुसम्पन्नम्। मतदातारः प्रातः सप्त वादनात् सायं चतुर्वादनपर्यन्तं चतुःशतोत्तर त्रयोदशसहस्राधिकं मतदानकेन्द्रेषु मतदानं कृतवन्तः। अपराह्ने द्विवादनं यावत् मतदानं पञ्चाशत् प्रतिशतं यावत् एव आसीत्, अन्तिमगणना श्रीलङ्का निर्वाचनआयोगेन प्रसारयिष्यते ।

**मेलकम्**

त्रिचत्वारिंशत्तमं भारत-अन्ताराष्ट्रिय-व्यापारमेलकम् अद्य नवदिल्ल्यां भारतमण्डपस्थाने समारब्धम्। अस्य वर्षस्य मेलकस्य विषयो विद्यते-सप्तचत्वारिंशदधिकद्विसहस्रतमे वर्षे विकसित-भारतमिति। केन्द्रीय वाणिज्य उद्योगमन्त्री पीयूषगोयलेन चतुर्दश दिवसीयास्य कार्यक्रमस्य उद्घाटनं विहितम्। अस्मिन् वर्षे प्रमुखराज्यं झारखण्डं सहभागिनौ च बिहार-उत्तरप्रदेशराज्ये स्त:। अपि च चीन – मिस्र – ईरान – दक्षिणकोरिया - थाइलैण्ड – तुर्की - संयुक्त – अरब-अमीरात देशान् समेत्य विभिन्ना: देशा: भागं स्वीकुर्वन्ति। मेलकमिदं अष्टादशदिनाङ्कं यावत् व्यवसायाय उद्घाटयिष्यते। तदनन्तरं सप्तविशंति- दिनाङ्कपर्यन्तं सामान्य-जनेभ्य: प्रचलिष्यति। एतत् मेलकं प्रात:काले दशवादनत: सायं सार्ध-सप्तवादनपर्यन्तम् उद्घाटितं भविष्यति।

**कर्मयोगी-सप्ताह**

कार्मिक राज्य मंत्री डॉ. जितेन्द्रसिंहः अकथयत् यत् राष्ट्रिय-शिक्षण-सप्ताहस्य कर्मयोगी-सप्ताहस्य परिणामः अद्भुतः अस्ति, तथा च एतत् सम्पूर्णे राष्ट्रे कर्मयोगी-जनान्, क्षमतावर्धनस्य निरन्तर-शिक्षणस्य च भावेन एकीकरोति इति। अद्य नवदेहली-नगरे कर्मयोगी-सप्ताहस्य समापनसमारोहं सम्बोधयन् श्रीसिंह: अवदत् यत्, राष्ट्रिय-शिक्षण-सप्ताहस्य विचारः प्रधानमन्त्रिण: नरेन्द्रमोदिन: आसीत् इति। असौ उक्तवान् यत्, शिक्षणप्रक्रिया सततं भवितुम् अर्हति इति। क्षमता-निर्माण-आयोगस्य अध्यक्षः आदिल् ज़ैनुल्-भाई इत्येषः अवदत् यत्, वेबिनार्-विशेषैः कार्यशालासु, आइ गोट. मञ्चे योग्यता-सम्बद्ध-शिक्षणस्य च माध्यमेन कार्यबलं आजीवन-शिक्षणस्य प्रतिबद्धता अङ्गीकृता इति। एकसप्ताहं यावत्, गतमासस्य नवदश दिनाङ्कात् सप्तविंशति दिनाङ्कपर्यन्तं, कर्मयोगी-सप्ताहस्य माध्यमेन देशस्य सर्वकारीय-कर्मकराः शिक्षणस्य विकासस्य च असाधारणयात्रायां मिलितवन्तः।

**स्वच्छता प्रतिज्ञाः**

सूचनाप्रसारणमन्त्रालयस्य वरिष्ठ आर्थिकपरामर्शदिन रविन्द्रकुमार जेना इत्यनेन अद्य दृश्य श्रव्य परान्तर्जालीय माध्यमेन अधिकारिभ्यः सामूहिकस्वच्छताप्रतिज्ञा प्रदत्ता। आकाशवाण्याः महानिदेशिकां डॉ. प्रज्ञापालीवालगौरं, अतिरिक्तमहानिदेशकं एल.मधुनागं च समेत्य अन्ये वरिष्ठाधिकारिणः नवदिल्ल्याः आकाशवाणीभवने स्वच्छताप्रतिज्ञां स्वीकृतवन्तः ।

**बैडमिण्टन्-क्रीडायां**

बैडमिण्टन्-क्रीडायां भारतस्य वारद्वयम् ओलम्पिकपदकविजेत्री पी.वी.सिन्धुः अद्य प्रातः चतुर्विंशत्यधिक द्विसहस्रतम वर्षस्य जापान कुमामोटोमास्टर्स इत्यस्याः महिला एकलक्रीडायाः प्र-प्रगुपान्त्यचक्रीयद्वन्द्वे कनाडादेशस्य मिशेल् ली इत्यनया एकविंशतिः-सप्तदश, षोडश-एकविंशतिः, सप्तदश-एकविंशतिः इत्यङ्कान्तरालेन पराजयं स्वीकृतवती।

**।। इति वार्ताः ।।**